শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ১০

*সৃষ্টিভেদৱর্ণনম্*

ৱৈকুণ্ঠ ৱর্ধিতবলোথ ভৱতপ্রসাদা-
দম্ভোজযোনিরসৃজত্ কিল জীৱদেহান্।
স্থাস্নূনি ভূরুহমযানি তথা তিরশ্চাং
জাতীর্মনুষ্যনিৱহানপি দেৱভেদান্॥ ১ ॥

মিথ্যাগ্রহাস্মিমতিরাগৱিকোপভীতি-
রজ্ঞানৱৃত্তিমিতি পঞ্চৱিধাং স সৃষ্ট্ৱা।
উদ্দামতামসপদার্থৱিধানদূন-
স্তেনে ত্ৱদীযচরণস্মরণং ৱিশুদ্ধ্যৈ॥ ২ ॥

তাৱত সসর্জ মনসা সনকং সনন্দং
ভূযসসনাতনমুনিং চ সনতকুমারম্।
তে সৃষ্টিকর্মণি তু তেন নিযুজ্যমানা
স্ত্ৱৎপাদভক্তিরসিকা জগৃহুর্ন ৱাণীম্॥ ৩ ॥

তাৱত্ প্রকোপমুদিতং প্রতিরুন্ধতোস্য
ভ্রূমধ্যতোজনি মৃডো ভৱদেকদেশঃ।
নামানি মে কুরু পদানি চ হা ৱিরিঞ্চে-
ত্যাদৌ রুরোদ কিল তেন স রুদ্রনামা॥ ৪ ॥

একাদশাহ্ৱযতযা চ ৱিভিন্নরূপং
রুদ্রং ৱিধায দযিতা ৱনিতাশ্চ দত্ত্ৱা।
তাৱন্ত্যদত্ত চ পদানি ভৱতপ্রণুন্নঃ
প্রাহ প্রজাৱিরচনায চ সাদরং তম্॥ ৫ ॥

www.prapatti.com

রুদ্রাভিসৃষ্টভযদাকৃতিরুদ্রসঙঘ-
সম্পূর্যমাণভুৱনত্রযভীতচেতাঃ।
মা মা প্রজাঃ সৃজ তপশ্চর মঙ্গলাযে-
ত্যাচষ্ট তং কমলভূর্ভৱদীরিতাত্মা॥ ৬ ॥

তস্যাথ সর্গরসিকস্য মরীচিরত্রি-
স্তত্রাঙ্গিরাঃ ক্রতুমুনিঃ পুলহঃ পুলস্ত্যঃ।
অঙ্গাদজাযত ভৃগুশ্চ ৱসিষ্ঠদক্ষৌ
শ্রীনারদশ্চ ভগৱান্ ভৱদঙঘ্রিদাসঃ॥ ৭ ॥

ধর্মাদিকানভিসৃজন্নথ কর্দমং চ
ৱাণীং ৱিধায ৱিধিরঙ্গজসঙ্কুলোভূত্।
ত্বদবোধিতৈসসনকদক্ষমুখৈস্তনূজৈ-
রুদবোধিতশ্চ ৱিররাম তমো ৱিমুঞ্চন্॥ ৮ ॥

ৱেদান্ পুরাণনিৱহানপি সর্ৱৱিদ্যাঃ
কুর্ৱন্ নিজাননগণাচ্চতুরাননোসৌ।
পুত্রেষু তেষু ৱিনিধায স সর্গৱৃদ্ধি-
মপ্রাপ্নুৱংস্তৱ পদাম্বুজমাশ্রিতোভূত্॥ ৯ ॥

জানন্নুপাযমথ দেহমজো ৱিভজ্য
স্ত্রীপুংসভাৱমভজন্মনুতদ্বধূভ্যাম্।
তাভ্যাং চ মানুষকুলানি ৱিৱর্ধযংস্তৱং
গোৱিন্দ মারুতপুরেশ নিরুন্ধি রোগান্॥ ১০ ॥

**********



www.prapatti.com